# विद्यावारिधिप्रवेशपरीक्षा-2013
# Ph.D ENTRANCE TEST-2013

**MAX.MARKS : 100** **TIME : 2hrs**

---

## प्रश्नपत्रिका

**1. समीचीनमुत्तरं चित्वा लिखत ।** **30*1=30**

१. साहित्यदर्पणे कति परिच्छेदाः सन्ति ?
अ. नव आ. सप्त इ. दश

२. अप्पय्यदीक्षितमते अलङ्काराः कति ?
अ. शतम् आ. विंशत्यधिकैकशतम् ई. पञ्चदशाधिकैकशतम्

३. कुन्तकस्य कालः कः ?
अ. दशमशतकम् आ. नवमशतकम् ई. द्वादशशतकम्

४. 'विना'शब्दयोगे तत्सम्बद्धं पदं कस्यां विभक्तौ भवति ?
अ. तृतीया आ. द्वितीया ई. पञ्चमी

५. औचित्यविचारचर्चायाः कः लेखकः ?
अ. मम्मटः आ. आनन्दवर्धनः ई. क्षेमेन्द्रः

६. अर्थगौरवविषये कः प्रसिद्धः ?
अ.माघः आ. भारविः ई. श्रीहर्षः

७. काव्यमीमांसायाः कर्ता कः ?
अ. राजशेखरः आ. राजवर्धनः ई. हर्षवर्धनः

८. चम्पूभारतं केन रचितम् ?
अ. भोजराजः आ. अनन्तभट्टः ई. अन्नम्भट्टः

९. दुष्यन्तस्य भार्या का ?
अ. ऊर्मिला आ. शकुन्तला ई. श्रुतकीर्तिः

१०. वेदानां विभागः केन कृतः ?
अ. व्यासेन आ. वाल्मीकिना ई. शुकेन

११. साङ्ख्यमतेन प्रपञ्चसृष्टेः मूलं कारणम् –
अ. प्रकृतिः आ. महत् ई. अहङ्कारः

१२. सर्वदर्शनसङ्ग्रहस्य कर्ता–
अ. हरिभद्रसूरिः आ. सायणः ई. नागेशः

१३. क्लिष्टाक्लिष्टवृत्तयः कति ?
अ. पञ्च आ. अष्ट ई. दश

१४. अयम् अद्वैतिनां वादः–
अ. अनिर्वचनीयवादः आ. सत्कार्यवादः ई. शून्यवादः

१५. ईश्वरजगतोः सम्बन्धः रामानुजमतेन –
अ. शरीरशरीरिभावः आ. बिम्बप्रतिबिम्बभावः ई. असत्कार्यवादः

१६. कस्य वेदस्य सम्बन्धिनी तैत्तिरीयसंहिता ?
अ. ऋग्वेदः आ. यजुर्वेदः ई. सामवेदः

१७. ऋग्वेदे मण्डलानां सङ्ख्या–
अ. नव आ.अष्ट ई. दश

१८. निरुक्तस्य कर्ता कः ?
अ. कौत्सः आ. यास्कः ई. गार्ग्यः

१९. "भद्रं कर्णेभिः श्रुणुयाम देवाः" कस्याः उपनिषदः शान्तिमन्त्रः एषः ?
अ. कठोपनिषदः आ. प्रश्नोपनिषदः ई. छान्दोग्योपनिषदः

२०. केनोपनिषत्–इत्यभिधानस्य निमित्तं किम् ?
अ. केन इति ऋषिः आ. केन इत्याद्यं पदम् ई. केनवेदमूलता

२१. अयं शक्तिविशिष्टाद्वैतसिद्धान्तग्रन्थः–
अ.सिद्धान्तशिखामणिः आ.सिद्धान्तबिन्दुः इ.सिद्धान्तमुक्तावली ई. सिद्धान्तशिरोमणिः

२२. एतेषु शोधकार्यस्य उत्तमम् उपकरणं किम् ?
अ. रेखाचित्रम् आ. दृष्टान्तः इ. प्रश्नावलिः ई. लेखनम्

२३. "मानाधीना मेयसिद्धिः" – अत्र मानं नाम किम् ?
अ. अभिमानम् आ. परिमाणम् इ. प्रमाणम् ई. सर्वम्

१४. संशोधनस्य उद्देश्यम्–
अ. यशः आ. धनार्जनम् इ. जीविका ई. तत्त्वज्ञानम्

१५. उत्तमसंशोधकः कीदृशः न भवेत् ?
अ. जिज्ञासुः आ. पठनशीलः इ. सहनशीलः ई. विषयान्तरसञ्चारी

२६. काश्मीरेषु कस्यां लिप्यां मातृकाः लभ्यन्ते ?

अ. शारदा आ. नन्दिनागरी इ. देवनागरी ई. अरेबिक्

२७. एषा शास्त्रप्रवृत्तिः न भवति–

अ. उद्देशः आ. खण्डनम् इ. लक्षणम् ई. परीक्षा

२८. सर्वेक्षणं नाम–

अ. पूर्वदर्शनम् आ. सर्वे क्षणाः इ. परिवीक्षणम् ई. Survey

२९. शोधकार्यस्य आद्यं सोपानम्–

अ. सिद्धान्तः आ. पूर्वपक्षः इ. आकरसङ्ग्रहः ई. व्याख्या

३०. यतीन्द्रमतदीपिकायाः कर्ता–

अ. वेदान्तदेशिकः आ. पिळ्ळै लोकाचार्यः ई. श्रीनिवासदासः

**2.लघूत्तराणि लिखत ।** **25*2=50**

१. अकारस्य कति भेदाः ? भेदान् लिखत ।

२. कारकं नाम किम् ? कारक नामानि उल्लिखत ।

३. उपेन्द्रवज्रावृत्तस्य लक्षणं किम् ?

४. रूपकं कतिविधम् ? उदाहरणानि लिखत ।

५. दुःखत्रयं किम् ?

६. समाप्तिः नाम का ?

७. अन्नभट्टरचितः प्रसिद्धः ग्रन्थः कः ? तस्य व्याख्या का ?

८. हेत्वाभासाः के ?

९. द्वन्द्वसमासस्य एकम् उदाहरणं ससूत्रं लिखत ।

१०. आप्तः कः उच्यते ?

११. अनुसन्धानमित्यस्य पर्यायशब्दः कः ?

१२. अनुसन्धानस्य अपेक्षिताः चत्वारः अंशाः के ?

१३. अनुबन्धचतुष्टयं किम् ?

१४. सिद्धान्तयुक्तयः कं पक्षं निराकुर्वन्ति ?

१५. ग्रन्थलिपिः देशस्य कस्मिन् प्रान्ते उपयुज्यते ?

१६. नन्दिनागर्याः कः आविष्कारयुगः ?

१७. भारते प्राचीनतमा लिपिः का ?

१८. तथ्यान्वेषणस्य के प्रकारा: ?

१९. विषयाणां सङ्क्षेपेण निरूपणाय उपयुक्तं प्राचीनतमं तन्त्रं किम् ?

२०. गां दोग्धि पय:– इत्यत्र केन सूत्रेण कर्मसंज्ञा ?

२१. उपक्रमादीनि कानि ?

२२. छायाग्रहा: के ?

२३. चतुर्दश विद्यास्थानानि कानि ?

२४. अधिकमास: कदा सम्पद्यते ?

२५. योगस्य अङ्गानि कानि ?

**3.अधोलिखित प्रश्नेषु एकमधिकृत्य टिप्पणीं लिखत** **5*1=5**

१. वाल्मीकि:

२. व्यास:

३. कालिदास:

४. कर्नाटकसंस्कृतविश्वविद्यालय:

५. मम संशोधनविषय:

६. प्रधानमातृका

**4. एषु विषयेषु स्वेष्टं स्वशास्त्रीयं एकमधिकृत्य पुटद्वयात्मकं प्रबन्धं लिखत ।** **15**

१. ध्वनिप्रस्थानम् **अथवा** रसप्रस्थानम्

२. लोकायतवाद: **अथवा** चैतन्योत्पत्तिवाद:

३. सत्कार्यवाद: **अथवा** प्रधानपुरुषविवेक:

४. वैदिकमन्त्रार्थनिर्णय: **अथवा** नासदीयसूक्तम्

५. तत्त्वमसि **अथवा** पञ्चीकरणम्

६. कार्यकारणभाव: **अथवा** प्रमाणानि

७. धर्मलक्षणं प्रमाणानि **वा**

८. सूर्योपराग: **अथवा** ग्रहमैत्री

९. चित्तवृत्तय: **अथवा** पञ्चक्लेशा:

१०. व्याकरणप्रयोजनानि **अथवा** कारकम्

११.इतिकर्तव्यता **अथवा** शाब्दीभावना

१२. संस्कृतप्रचारकार्ये सम्भाषणसन्देशस्य पात्रम् **अथवा** पुराणानि